अथअमरकोशेतृतीयकांडःप्रारंभः॥

(2)

अ० श्रीगणेशायनमः ॥ ॥ विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ॥ लिंगादिसंग्रहैवर्गाः सामान्येवर्गसंश्रयाः ॥१॥ स्त्रीदाराद्यैर्यी कां०
३५ द्विशेष्यंयादृशैः प्रस्तुतंपदैः ॥ गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्यभेदकाः ॥२॥ सुकृती पुण्यवान्धन्योमहेच्छस्तुमहाशयः ॥ हृद- ३
यालुः सुहृदयोमहोत्साहोमहोद्यमः ३॥ प्रवीणेनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ॥ वैज्ञानिकः कृतमुखः कृतीकुशलइत्यपि ॥ ४॥ पू
ज्यः प्रतिक्ष्यः सांशयिकः संशयापन्नमानसः ॥ दक्षिणीयोदक्षिणार्हस्तत्रदक्षिण्यइत्यपि ॥ ५॥ स्युर्वदान्यस्थूललक्ष्यदानशौंडाबहु
प्रदे ॥ जैवातृकः स्यादायुष्मानंतर्वाणिस्तुशास्त्रवित् ॥ ६॥ परीक्षकः कारणिकोवरदस्तुसमर्द्धकः ॥ हर्षमाणोविकुर्वाणः प्रमनाहृष्ट
मानसः ॥७॥ दुर्मनाविमनाअंतर्मनाः स्यादुत्कउन्मनाः ॥ दक्षिणेसरलोदारौसुकलोदातृभोक्तरि ॥८॥ तत्परेप्रसितासक्ताविष्टार्थौ
द्युक्तउत्सुकः ॥ प्रतीतेप्रथितख्यातवित्तविज्ञातविश्रुताः ९॥ गुणैः प्रतीतेतुकृतलक्षणाहतलक्षणौ ॥ इभ्यआढ्योधनीस्वामीत्वीश्व
रः पतिरीशिता ॥१०॥ अधिभूर्नायकोनेताप्रभुः परिवृढोऽधिपः ॥ अधिकर्द्धिः समृद्धः स्यात्कुटंबव्यापृतस्तुयः ॥११॥ स्यादभ्यागारिकस्त
स्मिन्नुपाधिश्चपुमानयं ॥ वरांगरूपोपेतोयः सिंहसंहननोहिसः ॥१२॥ निर्वार्यः कार्यकर्त्तायः संपन्नः सत्वसंपदा ॥ अवाचिमूकोऽथम
नोजवसः पितृसन्निभः ॥१३॥ सत्कृत्यालंकृतांकन्यायोददातिसकूकुदः ॥ लक्ष्मीवाँल्लक्ष्मणाश्रीलः श्रीमान्स्निग्धस्तुवत्सलः ॥१४॥ ३५
स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ॥ स्वतंत्रोऽपावृतः स्वैरीस्वच्छंदोनिरवग्रहः ॥१५॥ परतंत्रः पराधीनः परवान्नाथवान

(2A)

पि॥ अधीनोनिघ्नआयत्तोऽस्वच्छंदोगृह्यकोऽप्यसौ॥१६॥ खलपूःस्याद्बहुकरोदीर्घसूत्रश्चिरक्रियः॥ जाल्मोसमीक्ष्यकारीस्यात्कुंठो
मंदःक्रियासुयः॥१७॥ कर्मक्षमोऽलंकर्मीणाः क्रियावान्कर्मसूद्यतः॥ सकार्मिःकर्मशीलोयःकर्मशूरस्तुकर्मठः॥१८॥ भरण्यभुक्कर्मक
रःकर्मकारस्तुतत्क्रियः॥ अपस्नातोमृतस्नातआमिषाशीतुशौष्कुलः॥१९॥ बुभुक्षितःस्यात्क्षुधितोजिघत्सुरशनायितः॥ परान्नःपर-
पिंडादोभक्षकोघस्मरोऽद्मरः॥२०॥ आद्यूनःस्यादौदरिकोविजिगीषाविवर्जिते॥ उभौत्वात्मंभरिःकुक्षिंभरिःस्वोदरपूरके॥२१॥ सर्वा
न्नीनस्तुसर्वान्नभोजीगृध्नस्तुगर्धनः॥ लुब्धोऽभिलाषुकस्तृष्णक्समौलोलुपलोलुभौ॥२२॥ सोन्मादस्तून्मदिष्णुःस्यादविनीतःस-
मुद्धतः॥ मत्तेशौंडोत्कटक्षीबाःकामुकेकमितानुकः॥२३॥ कम्रःकामयिताऽभीकःकमनःकामनोऽभिकः॥ विधेयोविनयग्राहीवचने-
स्थितआश्रवः॥२४॥ वश्यःप्रणेयोनिभृतविनीतप्रश्रिताःसमाः॥ धृष्टेधृष्णग्वियातश्चप्रगल्भःप्रतिभान्विते॥२५॥ स्यादधृष्टेतुश
लीनोविलक्षोविस्मयान्विते॥ अधीरेकातरस्त्रस्तेभीरुभीरुकभीलुकाः॥२६॥ आशंसुराशंसितरिगृहयालुर्ग्रहीतरि॥ श्रद्धालुःश्रद्धया
युक्तेपतयालुस्तुपातुके॥२७॥ लज्जाशीलेऽपत्रपिष्णुर्वंदारुरभिवादके॥ शरारुर्घातुकोहिंस्रःस्याद्वर्द्धिष्णुस्तुवर्द्धनः॥२८॥ उत्प
तिष्णुस्तूत्पतिताऽलंकरिष्णुस्तुमंडनः॥ भूष्णुर्भविष्णुर्भवितावर्त्तिष्णुर्वर्त्तनःसमौ॥२९॥ निराकरिष्णुःक्षिप्नुःस्यात्सांद्रस्निग्ध-
स्तुमेदरः॥ ज्ञातातुविदुरोविंदुर्विकासीतुविकस्वरः॥३०॥ विसृत्वरोविसृमरःप्रसारिचविसारिणि॥ सहिष्णुःसहनःक्षंतातिति

(3)

अ· क्षुःक्षमितास्क्षमी ॥३१॥ क्रोधनोऽमर्षणःकोपीचंडस्त्वत्यंतकोपनः ॥ जागरूकोजागरिताघूर्णितःप्रचलायितः ॥ ३२ ॥ स्वप्नक्शयाकां·
३६ लुर्निद्रालुर्निद्राणशयितौसमौ ॥ पराङ्मुखःपराचीनःस्यादवाङ्प्यधोमुखः ॥ ३३ ॥ देवानंचतिदेवद्र्यङ्विष्वद्र्यङ्विष्वगंचति ॥ ३
यःसहांचतिसध्र्यङ्ससतिर्यङ्यस्तिरोंचति ॥ ३४ ॥ वदोवदावदोवक्तावागीशोवाक्पतिःसमौ ॥ वाचोयुक्तिपटुर्वाग्मीवावदूकोऽ
तिवक्तरि ॥ ३५ ॥ स्याज्जल्पाकस्तुवाचालोवाचाटोबहुगर्ह्यवाक् ॥ दुर्मुखेमुखराबद्धमुखौशाकुःप्रियंवदे ॥ ३६ ॥ लोहलःस्यादस्फु
टवाग्गर्ह्यवादीतुकद्वदः ॥ समौकुवादकुचरौस्यादसौम्यस्वरोऽस्वरः ॥ ३७ ॥ रवणःशब्दनोनांदीवादीनांदीकरःसमौ ॥ जडो-
ऽज्ञएडमूकस्तुवक्तुंश्रोतुमशिक्षिते ॥ ३८ ॥ तूष्णीशीलस्तुतूष्णीकोनग्नोऽवासादिगंबरे ॥ निष्कासितोऽवकृष्टःस्यादपध्वस्तस्तुधि
क्कृतः ॥ ३९ ॥ आत्तगर्वोऽभिभूतःस्याद्दापितःसमौ ॥ प्रत्यादिष्टोनिरस्तःस्यात्प्रत्याख्यातोनिराकृतः ॥ ४० ॥ निकृतःस्याद्विप्रकृतोवि
प्रलब्धस्तुवंचितः ॥ मनोहतःप्रतिहतःप्रतिबद्धोहतश्चसः ॥ ४१ ॥ अधिक्षिप्तःप्रतिक्षिप्तोबद्धेकीलितसंयतौ ॥ आपन्नआपत्प्रा
प्तःस्यात्कांदिशीकोभयद्रुतः ॥ ४२ ॥ आक्षारितःक्षारितोऽभिशस्तेसंकसुकोऽस्थिरे ॥ व्यसनार्तोपरक्तौद्वौविहस्तव्याकुलौसमौ-
४३ ॥ विक्लवोविह्वलःस्यात्तुविवशोऽरिष्टदुष्टधीः ॥ कश्यःकशार्हेसन्नद्धेत्वाततायीवधोद्यते ॥ ४४ ॥ द्वेष्येत्वक्षिगतोवध्यःशीर्ष- ३६
च्छेद्यइमौसमौ ॥ विष्योविषेणयोवध्योमुसल्योमुसलेनयः ॥ ४५ ॥ शिश्विदानोऽकृष्णकर्माचपलश्चिकुरःसमौ ॥ दोषैकदृक्पुरो

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

भागीनिकृतस्त्वनृजुः शठः ॥ ४६ ॥ कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलः ॥ नृशंसोघातुकः क्रूरः पापोधूर्त्तस्तुवंचकः ॥
४७॥ अज्ञेमूढयथाजातमूर्खवैधेयबालिशाः॥ कदर्येकृपणक्षुद्रकिंपचानमितंपचाः॥ ४८॥ निःस्वस्तुदुर्विधोदीनोदरिद्रोदुर्ग-
तोऽपिसः॥ वनीयकोयाचनकोमार्गणोयाचकार्थिनौ ॥ ४९॥ अहंकारवानहंयुः शुभंयुस्तुशुभान्विताः॥ दिव्योपपादुकादेवान्नृगं
वाद्याजरायुजाः॥ ५०॥ स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः॥ ॥इतिप्राणिवर्गः॥ ॥उद्भिदस्तरुगुल्माद्याउद्भिदु
द्भिज्जमुद्भिदं॥ ५१॥ सुंदरंरुचिरंचारुसुषमंसाधुशोभनं॥ कांतंमनोरमंरुच्यंमनोज्ञंमंजुमंजुलं॥ ५२॥ तदासेचनकंतृप्ते-
र्नास्त्यंतोयस्यदर्शनात् ॥ अभीष्टेऽभीप्सितंहृद्यंदयितंवल्लभंप्रियं॥ ५३॥ निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः॥ कुपूयकु-
त्सितावद्यखेटगर्ह्याणकाःसमाः॥ ५४॥ मलीमसंतुमलिनंकच्चरंमलदूषितं॥ पूतंपवित्रंमेध्यंचवीध्रंतुविमलार्थकं॥ ५५॥-
निर्णिक्तंशोधितंमृष्टंनिःशोध्यमनवस्करं ॥ असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके॥ ५६॥ क्लीबेप्रधानंप्रमुखप्रवे
कानुत्तमोत्तमाः॥ मुख्यवर्यवरेण्याश्चप्रवर्होऽनवरार्ध्यवत्॥ ५७॥ परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियं॥ श्रेयान्श्रेष्ठःपुष्क-
लःस्यात्सत्तमश्चातिशोभने॥ ५८॥ स्युरुत्तरपदेव्याघ्रपुंगवर्षभकुंजराः॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराः॥ ५९॥ अप्राग्र्यं
द्वयहीनेद्वेअप्रधोपसर्जने॥ वशंकटंपृथुबृहद्विशालंपृथुलंमहत्॥ ६०॥ वड्रोरुविपुलंपीनपीव्नीतुस्थूलपीवरे॥ स्तोकाल्पक्षुल्लकाः

(५)

अ· सूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु॥६१॥स्त्रियांमात्रात्रुटिःपुंसिलवलेशकणाणवः॥अत्यल्पेऽल्पिष्ठमल्पीयःकनीयोऽणीयइत्यपि॥६२॥प्रभू- कां·
३७ तंप्रचुरंप्राज्यमदभ्रंबहुलंबहु॥पुरुहूःपुरुभूयिष्ठंस्फारंभूयश्चभूरिच॥६३॥परःशताद्यास्तेयेषांपरासंख्याशतादिकात्॥गण- ३
नीयेतुगणेयंसंख्यातेगणितमथसमंसर्वं॥६४॥विश्वमशेषंकृत्स्नंसमस्तनिखिलाखिलानिनिःशेषं॥समग्रंसकलंपूर्णमखंडंस्या-
दनूनके॥६५॥घनंनिरंतरंसांद्रंपेलवंविरलंतनु॥समीपेनिकटासन्नसन्निकृष्टसनीडवत्॥६६॥सदेशाभ्याशसविधसमर्यादसवेश-
वत्॥उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययं॥६७॥संसक्तेत्वव्यवहितमपदांतरमित्यपि॥नेदिष्ठमंतिकतमंस्याद्दूरंविप्रकृष्टकं
६८॥दवीयश्चदविष्ठंचसुदूरंदीर्घमायतं॥वर्त्तुलंनिस्तलंवृत्तंबंधुरंतून्नतानतं॥६९॥उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेऽथवामने॥न्य-
ङ्नीचखर्वह्रस्वाःस्युरवाग्रेवनतानतं॥७०॥अरालंवृजिनंजिह्ममूर्मिमत्कुंचितंनतं॥आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि॥७१॥
ऋजावजिह्मप्रगुणौव्यस्तेत्वप्रगुणाकुलौ॥शाश्वतस्तुध्रुवोनित्यसदातनसनातनाः॥७२॥स्थास्नुःस्थिरतरःस्थेयानेकरूपतयातुयः
॥कालव्यापीसकूटस्थःस्थावरोजंगमेतरः॥७३॥चरिष्णुजंगमचरंत्रसमिंगंचराचरं॥चलनंकंपनंकंप्रंचलंलोलंचलाचलं॥७४॥चं-
चलंतरलंचैवपारिप्लवपरिप्लवे॥अतिरिक्तःसमधिकोदृढसंधिस्तुसंहतः॥७५॥कर्कशंकठिनंक्रूरंकठोरंनिष्ठुरंदृढं॥जठरंमूर्त्तिमन्मूर्त्तंप्र- ३७
वृद्धंप्रौढमेधितं॥७६॥पुराणेप्रतनप्रत्नपुरातनचिरंतनाः॥प्रत्यग्रोऽभिनवोनव्योनवीनोनूतनोनवः॥७७॥नूत्नश्चसुकुमारंतुकोमलंमृ-

दुलंमृदु ॥ अन्वगन्वक्षमनुगेऽनुपदंक्लीबमव्ययं ॥ ७८ ॥ प्रत्यक्षंस्यादैंद्रियकमप्रत्यक्षमतींद्रियं ॥ एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥
७९ ॥ अप्येकसर्गएकाग्र्योऽप्येकायनगतोऽपिसः ॥ पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियां ॥ ८० ॥ अंतोजघन्यंचरममंत्यपा
श्चात्यपश्चिमाः ॥ मोघंनिरर्थकंस्पष्टंस्फुटंप्रव्यक्तमुल्बणं ॥ ८१ ॥ साधारणंतुसामान्यमेकाकीत्वेकएककः ॥ भिन्नार्थकाअन्यतरएक
स्त्वोऽन्यतरावपि ॥ ८२ ॥ उच्चावचंनैकभेदमुच्चंडमविलंबितं ॥ अरुंतुदस्तुमर्मस्पृगबाधंतुनिरर्गलं ॥ ८३ ॥ प्रसव्यंप्रतिकूलंस्यादप
सव्यमपष्ठुच ॥ वामंशरीरंसव्यंस्यादपसव्यंतुदक्षिणं ॥ ८४ ॥ संकटंनात्तुसंबाधः कलिलंगहनंसमे ॥ संकीर्णेसंकुलाकीर्णेमुंडितं
परिवापितं ॥ ८५ ॥ ग्रंथितंसंदितंदृब्धंविसृतंविस्तृतंततं ॥ अंतर्गतंविस्मृतंस्यात्प्राप्तप्रणिहितेसमे ॥ ८६ ॥ वेल्लितप्रेंखिताधूतचलिताकं
पिताधुते ॥ नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताःसमाः ॥ ८७ ॥ परिक्षिप्तंतुनिवृतंमूषितंमूषितार्थकं ॥ प्रवृद्धप्रसृतेन्यस्तनिसृष्टेगु-
णिताहते ॥ ८८ ॥ निदिग्धोपचितेगूढगुप्तेगुंठितरूषिते ॥ द्रुतावदीर्णेउद्गूर्णोद्यतेकाचितशिक्यिते ॥ ८९ ॥ घ्राणघ्रातेदिग्धलिप्त—
समुदक्तोद्धृतेसमे ॥ वेष्टितंस्याद्वलयितंसंवीतंरुद्धमावृतं ॥ ९० ॥ रुग्णंभुग्नेऽथनिशितक्ष्णुतशातानितेजिते ॥ स्याद्विनाशोन्मुखंप-
क्वंह्रीणह्रीतौतुलज्जिते ॥ ९१ ॥ वृत्तेतुवृत्तव्यावृत्तौसंयोजितउपाहितः ॥ प्राप्यंगम्यंसमासाद्यंस्यन्नंरीणंस्रुतंस्रुतं ॥ ९२ ॥ संगूढः
स्यात्संकलितोऽवगीतःख्यातगर्हणः ॥ विविधःस्याद्बहुविधोनानारूपःपृथग्विधः ॥ ९३ ॥ अवरीणोधिक्कृतश्चाप्यवध्वस्तोऽवचू-

(5)





र्णितः॥अनायासकृतंफाण्टंस्वनितंध्वनितंसमे॥९४॥बद्धेसंदानितंमूतमुद्दितंसंदितंसितं॥निष्पक्वेक्वथितंपाकेक्षीराज्यहविषां
शृतं॥९५॥निर्वाणोमुनिवन्ह्यादौनिर्वातस्तुगतेऽनिले॥पक्वंपरिणतेगूनंहन्नेमीढंतुमूत्रिते॥९६॥पुष्टेतुपुषितंसोढेक्षान्तमु-
द्वान्तमुद्गते॥दान्तस्तुदमितेशान्तःशमितेप्रार्थितेऽर्दितः॥९७॥ज्ञप्तस्तुज्ञपितेछन्नश्छादितेपूजितेऽञ्चितः॥पूर्णस्तुपूरितेक्लि-
ष्टःक्लिशितेऽवसितेसितः॥९८॥प्रुष्टप्लुष्टोषितादग्धेतष्टत्वष्टौतनूकृते॥वेधितच्छिद्रितौविद्धेविन्नवित्तौविचारिते॥९९॥निष्प्रभेवि
गतारोकौविलीनेविद्रुतद्रुतौ॥सिद्धेनिर्वृत्तनिष्पन्नौदारितेभिन्नभेदितौ॥१००॥ऊतंस्यूतमुतंचेतित्रितयंतन्तुसंतते॥स्यादर्हितेनम-
सितमपचायितार्चितापचितं॥१०१॥वरिवसितेवरिवस्यितमुपासितंचोपचरितंच॥संतापितसंतप्तौधूपितधूपायितौचदूनश्च॥
१०२॥हृष्टेमत्तस्तृप्तःप्रल्हन्नःप्रमुदितःप्रीतः॥छिन्नंछातंलूनंकृत्तंदातंदितंछितंवृक्णं॥१०३॥स्रस्तंध्वस्तंभ्रष्टंस्कन्नंपन्नंच्युतंगलितं,
लब्धंप्राप्तंविन्नंभावितमासादितंचभूतंच॥४॥अन्वेषितंगवेषितमन्विष्टंमार्गितंमृगितं॥आर्द्रंसार्द्रंक्लिन्नंतिमितंस्तिमितंसमुन्नमु
त्तंच॥५॥त्रातंत्राणंरक्षितमवितंगोपायितंचगुप्तंच॥अवगणितमवमतावज्ञातेऽवमानितंचपरिभूते॥६॥त्यक्तंहीनंविधुतंसमुज्झि
तंधूतमुत्सृष्टे॥उक्तंभाषितमुदितंजल्पितमाख्यातमभिहितंलपितं॥७॥बुद्धंबुधितंमनितंविदितंप्रतिपन्नमवसितावगते॥ऊरीकृतमु
ररीकृतमङ्गीकृतमाश्रुतंप्रतिज्ञातं॥८॥संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतं॥ईलितशस्तपणायितपनायितप्रणुतपणितपनि

(5a)

त्तानि॥९॥अपिगीर्णवर्णिताभिष्टुतेडितानिस्तुतार्थानि॥भक्षितचर्वितलीढप्रत्यवसितगिलितखादितप्सातं॥१०॥अभ्यवहृतान्नजग्ध
ग्रस्तग्लस्ताशितंभुक्ते॥क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः॥११॥क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुलप्रकर्षार्थाः॥साधिष्ठद्रा
घिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृंदिष्ठाः॥१२॥बाढव्यायतबहुगुरुवामनवृंदारकातिशये॥ ॥इतिविशेष्यनिघ्नवर्गः॥ ॥प्रकृतिप्रत्य-
यार्थाद्यैःसंकीर्णेलिंगमुन्नयेत्॥कर्मक्रियातत्सातत्ययोगेस्युरपरस्पराः॥१॥साकल्यासंगवचनेपारायणपरायणे॥यदृच्छास्वैरि
ताहेतुशून्यात्वास्याविलक्षणं॥२॥शमथस्तुशमःशांतिर्दांतिस्तुदमथोदमः॥अवदानंकर्मवृत्तंकाम्यदानंप्रवारणं॥३॥वशक्रियासं
वननंमूलकर्मतुकार्मणं॥विधूननंविधुवनंतर्पणंप्रीणनावनं॥४॥पर्याप्तिःस्यात्परित्राणंहस्तधारणमित्यपि॥सेवनंसीवनंस्यूतिर्वि
दरःस्फुटंभिदा॥५॥आक्रोशनमभीषंगःसंवेदोवेदनानना॥संमूर्छनमभिव्याप्तिर्याञ्चाभिसाऽर्थनाऽर्दना॥६॥वर्द्धनंछेदनेऽथ-
द्वेआनंदनसभाजने॥आप्रच्छन्नमथाम्नायःसंप्रदायःक्षयेक्षिया॥७॥ग्रहेग्राहोवशःकांतौरक्ष्णस्त्राणेरणःक्वणे॥व्याधोवेधेप
चापाकेहवोहूतौवरोवृतौ॥८॥ओषःप्लोषेण योनायेज्यानिर्जीर्णौभ्रमोभ्रमौ॥स्फातिर्वृद्धौप्रथाख्यातौस्पृष्टिःपृक्तौस्रवःस्रवे
९॥एधासमृद्धौस्फुरणेस्फुरणाप्रमितौप्रमा॥प्रसूतिःप्रसवेश्च्योतेप्राघारःक्लमथःक्लमे॥१०॥उत्कर्षोऽतिशयेसंधिःश्लेषेविषयआ
श्रये॥क्षिपायांक्षेपणंगीर्णिर्गिरौगुरणमुद्यमे॥११॥उन्नायउन्नयेश्रायःश्रयणेजयनेजयः॥निगादोनिगदेमादोमदउद्वेगउद्भ्रमे॥१२

(6)

अ· विमर्दनंपरिमलोऽभ्युपपत्तिरनुग्रहः॥निग्रहस्तद्विरुद्धः स्यादभियोगस्त्वभिग्रहः॥१३॥मुष्टिबंधस्तुसंग्राहो डिंबेडमरविप्लवौ॥बं- कां·
३९ धनंप्रसितिश्चारःस्पर्शःस्प्रष्टोपतप्तरि॥१४॥निकारोविप्रकारःस्यादाकारस्त्विंगइंगितं॥परिणामोविकारोद्वेसमेविकृतिविक्रि- ३
ये॥१५॥अपहारस्त्वपचयःसमाहारःसमुच्चयः॥प्रत्याहारउपादानंविहारस्तुपरिक्रमः॥१६॥ अभिहारोऽभिग्रहणंनिर्हा
रोऽभ्यवकर्षणं॥अनुहारोऽनुकारःस्यादर्थस्यापगमेव्ययः॥१७॥प्रवाहस्तुप्रवृत्तिःस्यात्प्रवहोगमनंबहिः॥वियामोवियमोयामो
यम संयामसंयमौ॥१८॥हिंसाकर्माभिचारः स्याज्जागर्याजागराद्वयोः॥विघ्नोऽतरायःप्रत्यूहःस्यादुपघ्नोऽतिकाश्रये॥१९॥नि
र्वेशउपभोगःस्यात्परिसर्पःपरिक्रिया॥विधुरंतुप्रविश्लेषेऽभिप्रायश्छंदआशयः॥२०॥संक्षेपणंसमसनंपर्यवस्थाविरोधनं॥प-
रिसर्यापरीसारःस्यादास्यात्वासनास्थितिः॥२१॥विस्तारोविग्रहोव्यासःसचशब्दस्यविस्तरः॥संवाहनंमर्दनंस्याद्विनाशःस्याद-
र्शनं॥२२॥संस्तवःस्यात्परिचयःप्रसरस्तुविसर्पणं॥नीवाकस्तुप्रयामःस्यात्सन्निधिःसन्निकर्षणं॥२३॥ लवोऽभिलावोलवनेनि
ष्पावःपवनेपवः॥प्रस्तावःस्यादवसरस्त्रसरःसूत्रवेष्टनं॥२४॥प्रजनःस्यादुपसरःप्रश्रयप्रणयौसमौ॥धीशक्तिर्निष्क्रमोऽस्त्री
तुसंक्रमोदुर्गसंचरः॥२५॥प्रत्युत्क्रमःप्रयोगार्थःप्रक्रमःस्यादुपक्रमः॥स्यादभ्यादानमुद्घातआरंभःसंभ्रमस्त्वरा॥२६॥प्रति ३९
प्रतिबंधःप्रतिष्टंभोऽवनायस्तुनिपातनं॥उपलंभस्त्वनुभवःसमालंभोविलेपनं॥२७॥विप्रलंभोविप्रयोगोविलंभस्त्वतिसर्जनं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

॥ विश्रावस्तुप्रतिख्यातिरवेक्षाप्रतिजागरः ॥ २८ ॥ निपाठनिपठौ पाठे तेमस्तेमौ समुंदने ॥ आदीनवास्रवौ क्लेशे मेलके संगसंगमौ ॥ २९
संवीक्षणंविचयनंमार्गणंमृगणामृगः ॥ परिरंभःपरिष्वंगःसंश्लेषउपगूहनं ॥ ३० ॥ निर्वर्णनंतुनिध्यानंदर्शनालोकनेक्षणं ॥ प्रत्याख्यानं
निरसनंप्रत्यादेशोनिराकृतिः ॥ ३१ ॥ उपशायोविशायश्चपर्यायशयनार्थकौ ॥ अर्तनंचऋतीयाचहृणीयाचघृणार्थकाः ॥ ३२ ॥ स्याद्व्यत्यासो
विपर्यासोव्यत्ययश्चविपर्यये ॥ पर्ययोतिक्रमस्तस्मिन्नतिपातउपात्ययः ॥ ३३ ॥ प्रेषणंयत्समाहूयतत्रस्यात्प्रतिशासनं ॥ संसं-
स्तावःक्रतुषुयास्तुतिभूमिर्द्विजन्मनां ॥ ३४ ॥ निधायतक्ष्यतेयत्रकाष्ठेकाष्ठंसउद्घनः ॥ स्तंबघ्नस्तुस्तंबघनःस्तंबोयेननिहन्यते ॥ ३५
आविधोविध्यतेयेनतत्रविष्वक्समेनिघाः ॥ उत्कारश्चनिकारश्चद्वौधान्योत्क्षेपणार्थकौ ॥ ३६ ॥ निगारोद्गारविक्षावोद्ग्राहास्तुगरणादिषु
३७ ॥ आरत्यवरतिविरतयउपरामेऽथास्त्रियांतुनिष्ठेवः ॥ निष्ठ्यूतिर्निष्ठेवनंनिष्ठीवनमित्यभिन्नानि ॥ ३८ ॥ जवनेजूतिःसातिस्त्व-
वसानेस्यादथज्वरेजूर्तिः ॥ उदजस्तुपशुप्रेरणमकरणिरित्यादयःशापे ॥ ३९ ॥ गोत्रांतेभ्यस्तस्यवृंदमित्यौपगवकादिकं ॥ आपूपि-
कंशाष्कुलिकमेवमाद्यमचेतसां ॥ ४० ॥ माणवानांतुमाणव्यंसहायानांसहायता ॥ हल्याहलानांब्राह्मण्यवाडव्येतुद्विजन्मनां
४१ ॥ द्वेपर्शुकानांपृष्ठानांपार्श्वंपृष्ठ्यमनुक्रमात् ॥ खलानांखलिनीखल्याऽप्यथमानुष्यकंनृणां ॥ ४२ ॥ ग्रामताजनताधूम्यापा-
श्यागल्यापृथक्पृथक् ॥ अपिसाहस्रकारीषवार्मणाथर्वणादिकं ॥ ४३ ॥ ॥ इतिसंकीर्णवर्गः ॥ ॥ नानार्थाःकेऽपिकां

(७)

अ· लादिवर्गेषैवात्रकीर्त्तिताः ॥ भूरिप्रयोगायेयेषुपर्यायेष्वपितेषुते ॥ १ ॥ आकाशेत्रिदिवेनाकोलोकस्तुभुवनेजने ॥ पद्येयशसिचश्लोकः शरे- का·
४० खड्गेचसायकः ॥ २ ॥ जंबुकौक्रोष्टुवरुणौपृथुकौचिपिटार्भकौ ॥ आलोकौदर्शनद्योतौभेरीपटहमानकौ ॥ ३ ॥ उत्संगचिन्हयोरंकः कलंकोऽकोप- ३
वादयोः ॥ तक्षकोनागवर्द्धक्योरर्कः स्फटिकसूर्ययोः ॥ ४ ॥ मारुतेवेधसिब्रध्नेपुंसिकः कंशिरोऽबनोः ॥ स्यात्पुलाकस्तुच्छधान्येसंक्षेपेभक्त
सिक्थके ॥ ५ ॥ उलूकेकरिणः पुच्छमूलोपांतेचपेचकः ॥ कमंडलौचकरकः सुगतेचविनायकः ॥ ६ ॥ किष्कुर्हस्तेवितस्तौचश्मूककीटेचवृ-
श्चिकः ॥ प्रतिकूलेप्रतिकुस्त्रिष्वेकदेशेतुपुंस्ययं ॥ ७ ॥ स्याद्भूतिकंतुभूनिंबेकत्तृणेभूस्तृणेऽपिच ॥ ज्यात्त्रिकायांचयोषेचकोशातक्य
थकट्फले ॥ ८ ॥ सितेच्चखदिरेसोमवल्कः स्यादथसिंल्हके ॥ तिलकल्केचपिण्याकोबाल्हीकंरामठेऽपिच ॥ ९ ॥ महेंद्रगुग्गुलूलूकव्याल
ग्राहिषुकौशिकः ॥ रुक्तापशंकास्वातंकः स्वल्पेऽपिक्षुल्लकस्त्रिषु ॥ १० ॥ जैवातृकः शशांकेऽपिखुरेऽप्यश्वस्यवर्त्तकः ॥ व्याघ्रेऽपि
पुंडरीकोनायवान्यामपिदीपकः ॥ ११ ॥ शालावृकाः कपिक्रोष्टुश्वानः स्वर्णेऽपिगैरिकं ॥ पीडार्थेऽपिव्यलीकंस्यादलीकंत्वप्रिये
ऽनृते ॥ १२ ॥ शीलान्वयावनूकेद्वेशल्केशकलवल्कले ॥ साष्टेशतेसुवर्णानांहेम्न्युरोभूषणेपले ॥ दीनारेऽपिचनिष्कोऽस्त्रीकल्कोऽस्त्रीशमले
नसोः, दंभेऽप्यथपिनाकोऽस्त्रीशूलशंकरधन्वनोः ॥ १४ ॥ धेनुकातुकरेण्वांचमेघजालेचकालिका ॥ कारिकायातनावृत्त्योः कर्णिकाकर्ण ४०
भूषणे ॥ १५ ॥ करिहस्तेंऽगुलौपद्मबीजकोश्यांत्रिषूत्तरे, वृंदारकौरूपिमुख्यावेकेमुख्यान्यकेवलाः १६, स्याड्डांभिकः कौक्कुटिकोयश्चादूरेरिते

क्षणः ॥ लालाटिकः प्रभोर्भालदर्शीकार्याक्षमश्चयः ॥१७॥ “भूभृन्नितंबवलयचक्रेषुकटकोऽस्त्रियां ॥ सूच्यग्रेक्षुद्रशत्रौचरोमहर्षे
चकंटकः ॥१॥ पाकोपक्तिशिशूमध्यरत्नेनेतरिनायकः ॥ पर्यंकः स्यात्परिकरेस्याद्व्याघ्रेऽपिचलुब्धकः ॥२॥ आर्द्रायामपिलुब्धकइत्यपि
पाठः ॥ पेटकस्त्रिषुवृंदेऽपिगुरौदेश्येचदेशिकः ॥ खेटकोग्रामफलकौधीवरेऽपिचजालिकः ॥३॥ पुष्करेणोचकिंजल्कः शुल्कोऽस्त्री
स्त्रीधनेऽपिच ॥ स्यात्कल्लोलेऽप्युत्कलिकावार्द्धकंभाद्वंदयोः ॥४॥ करिण्यांचापिगणिकादारकौबालभेदकौ ॥ अंध्येऽप्यनेडमूकस्या
त्टंकोदर्पाश्मदारणो ॥५॥” ॥ इतिपंचक्षेपकाः ॥ ॥ इतिकांतवर्गः ॥ ॥ मयूरवस्त्विट्करज्वालास्वलिबाणोशिलीमुखौ ॥ शं-
खोनिधौललाटास्थ्निकंबौनस्त्रींद्रियेऽपिखं ॥१८॥ घृणिर्ज्वालेअपिशिखे ॥ इतिखांताः ॥ शैलवृक्षौनगावगौ ॥ आशुगौवायुवि
शिखौशरार्कविहगाःखगाः ॥१९॥ पतंगौपक्षिसूर्यौचपूगः क्रमुकवृंदयोः ॥ पशवोऽपिमृगावेगः प्रवाहजवयोरपि ॥२०॥ परागःकौ
सुमेरेणौस्नानीयादौरजस्यपि ॥ गजेऽपिनागमातंगावपांगस्तिलकेऽपिच ॥२१॥ सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ॥ यो
गः सन्नहनोपायध्यानसंगतियुक्तिषु ॥२२॥ भोगः सुखेस्त्र्यादिभृतावहेश्चफणकाययोः ॥ चातकेहरिणेपुंसिसारंगः शबलेत्रिषु ॥२३॥ क
पौचप्लवगः शापेत्वभिषंगः पराभवे ॥ यानाद्यंगेयुगः पुंसियुगंयुग्मेकृतादिषु ॥२४॥ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ ल-
क्ष्यदृष्ट्यास्त्रियांपुंसिगौर्लिंगंचिन्हशेफसोः ॥२५॥ शृंगंप्राधान्यसान्वोश्चवरांगंमूर्द्धगुह्ययोः ॥ भगंश्रीकाममाहात्म्यवीर्ययत्ना-

Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

अ॰ र्ककीर्त्रिषु ॥२६॥ इतिगांताः ॥ परिघः परिघातेऽस्त्रेऽप्योघोवृंदेंऽभसांरये ॥ मूल्येपूजाविधावर्घोंऽहोदुःखव्यसनेष्वघं ॥२७॥ कां॰
४१ त्रिष्विष्टेऽल्पेलघुः । इतिघांताः । काचाः शिक्यमृद्भेददृग्रुजः ॥ विपर्यासेविस्तरेचप्रपंचःपावकेशुचिः ॥२८॥ मास्यमालेचाप्युपधे ३
पुंसिमेध्येसितेत्रिषु ॥ अभिष्वंगेस्पृहायांचगभस्तौचरुचिस्त्रियां ॥२९॥ इतिचांताः ॥"प्रसन्नेभल्लुकेऽप्यच्छोगुच्छःस्तबकहार
योः ॥ परिधानांचलेकच्छोजलप्रांतेत्रिलिंगकः ॥१॥" इतिक्षेपकश्लोकः ॥ केकितार्क्ष्यावहिभुजौदंतविप्रांडजाद्विजाः ॥ अजाविष्णु
हरच्छागागोष्ठाध्वनिवहाव्रजाः ॥३०॥ धर्मराजौजिनयमौकुंजोदंतेऽपिनस्त्रियां ॥ वलजेक्षेत्रपूर्द्वारेवलजावल्गुदर्शना ॥३१॥ समर्
क्ष्मांशेरणेऽप्याजिः प्रजास्यात्संततौजने ॥ अब्जौशंखशशांकौचस्वकेनित्येनिजंत्रिषु ॥३२॥ इतिजांताः ॥ पुंस्यात्मनिप्रवी-
णेचक्षेत्रज्ञोवाच्यलिंगकः ॥ संज्ञास्याच्चेतनानामहस्ताद्यैश्चार्थसूचना ॥३३॥ इतिञांताः ॥ काकेभगंडौकरटौगजगंडकटीक-
टौ ॥ शिपिविष्टस्तुखलतौदुश्चर्मणिमहेश्वरे ॥३४॥ देवशिल्पिन्यपित्वष्टादिष्टंदैवेऽपिनद्वयोः ॥ रसेकटुःकट्वकार्येत्रिषुमत्सरतीक्ष्ण
योः ॥ रिष्टंक्षेमाशुभाभावेष्वरिष्टेतुशुभाशुभे ॥३५॥ मायानिश्चलयंत्रेषुकैतवानृतराशिषु ॥ अयोघनेशैलशृंगेसीरांगेकूटमस्त्रि-
यां ॥३६॥ सूक्ष्मैलायांत्रुटिःस्त्रीस्यात्कालेऽल्पेसंशयेऽपिसा ॥ आत्युत्कर्षाश्रयःकोट्योमूलेलग्नकचेजटा ॥३८॥ व्युष्टिःफलेसमृ- ४१
द्धौचदृष्टिर्ज्ञानेक्ष्णिदर्शने ॥ इष्टिर्यागेच्छयोःसृष्टंनिश्चितेबहुनित्रिषु ॥३८॥ कष्टेतुकृच्छ्रगहनेदक्षामंदागदेषुच ॥ पटुर्द्वौवाच्यलिंगौच

(8A)

इति टांताः ॥ नीलकंठः शिवेऽपि च ॥ ३९ ॥ पुंसिकोष्ठोंऽतर्जठरंकुसूलोंऽतर्गृहंतथा ॥ निष्ठानिष्पत्तिनाशांताः काष्ठोत्कर्षेस्थितौदिशि ॥ ४०
त्रिषुज्येष्ठोऽतिशस्तेऽपिकनिष्ठोऽतियुवाल्पयोः ॥ इति ठांताः ॥ दंडोऽस्त्री लगुडेऽपिस्याद्गुडोगोलेक्षुपाकयोः ॥ ४१ ॥ सर्पमांसात्पशू-
व्याडोगोभूवाचस्त्विडाइलाः ॥ क्ष्वेडावंशशलाकाऽपिनाडीनालेऽपिषट्क्षणे ॥ ४२ ॥ कांडोऽस्त्रीदंडबाणार्ववर्गावसरवारिषु ॥ स्या
द्भांडमश्वाभरणेऽमत्रेमूलवणिग्धने ॥ ४३ ॥ इति डांताः ॥ भृशप्रतिज्ञयोर्वाढंप्रगाढंभृशकृच्छ्रयोः ॥ शक्तस्थूलौत्रिषुदृढौव्यूढौविन्य
स्तसंहतौ ॥ ४४ ॥ इति ढांताः ॥ भ्रूणोऽर्भकेस्त्रैणगर्भेबाणोबलिसुतेशरे ॥ कणोऽतिसूक्ष्मेधान्यांशेसंघातेप्रमथेगणः ॥ ४५ ॥ पणो
द्युतादिषूत्सृष्टेभृतौमूलेधनेऽपिच ॥ मौर्व्यांद्रव्याश्रितेसत्त्वशौर्यसंध्यादिकेगुणः ॥ ४६ ॥ निर्व्यापारस्थितौकालविशेषोत्सवयोःक्षणः ॥ वर्णो
द्विजादौशुक्लादौस्तुतौवर्णंतुवाऽक्षरे ॥ ४७ ॥ अरुणोभास्करेऽपिस्याद्वर्णभेदेऽपिचत्रिषु ॥ स्थाणुःशर्वोऽप्यथद्रोणःकाकेऽप्याजौर-
वेरणः ॥ ४८ ॥ ग्रामणीर्नापितेपुंसिश्रेष्ठेग्रामाधिपेत्रिषु ॥ ऊर्णामेषादिलोम्निस्यादावर्तेचांतराभ्रुवोः ॥ ४९ ॥ हरिणीस्यान्मृगीहेम
प्रतिमाहरिताचया ॥ त्रिषुपांडौचहरिणाःस्थूणास्तंभेऽपिवेश्मनः ॥ ५० ॥ तृष्णेस्पृहापिपासेद्वेजुगुप्साकरुणेघृणे ॥ वणिक्पथेचविप-
णिःसुराप्रत्यक्कवारुणी ॥ ५१ ॥ करेणुरिभ्यांस्त्रीनेभेद्रविणंतुबलंधनं ॥ शरणंगृहरक्षित्रोःश्रीपर्णंकमलेऽपिच ॥ ५२ ॥ विषाभिमरलो
हेषुतीक्ष्णंक्लीबेखरेत्रिषु ॥ प्रमाणंहेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ॥ ५३ ॥ करणंसाधकतमंक्षेत्रगात्रेंद्रियेष्वपि ॥ प्राण्युत्पादेसंसर-

(९)

अ· पामसंबाधश्चसूगतौ ॥ ५४॥ घंटापंथेऽथवांतान्नेसमुद्गिरणमुन्नये ॥ अतस्त्रिषुविषाणंस्यात्पशुशृंगेभदंतयोः ॥५५॥ प्रवणंक्र· कां·
४२ मनिम्नोर्व्यांप्रव्हेनातुचतुष्पथे ॥ संकीर्णौनिचिताशुद्धौविरिणंशून्यमूषरं ॥ ५६ ॥ "सेतौचवरणोवेणीनदीभेदेकचोच्चये ॥" इ ३
तिणांताः ॥ देवसूर्यौविवस्वंतौसरस्वंतौनदार्णवौ ॥ पक्षितार्क्ष्यौगरुत्मंतौशकुंतौभासपक्षिणौ ॥५७॥ अग्न्युत्पातौधूमकेतूजी·
मूतौमेघपर्वतौ ॥ हस्तौतुपाणिनक्षत्रेमरुतौयवनामरौ ॥५८॥ यंताहस्तिपकेसूतेभर्ताधातरिपोष्टरि ॥ यानपात्रेशिशौपोतःप्रेतः
प्राण्यंतरेमृते ॥ ५९ ॥ ग्रहभेदेध्वजेकेतुःपार्थिवेतनयेसुतः ॥ स्थपतिःकारुभेदेऽपिभूभृद्भूमिधरेनृपे ॥ ६० ॥ मूर्धाभिषिक्तोभूपेऽपिऋ
तुःस्त्रीकुसुमेऽपिच ॥ विष्णावप्यजिताव्यक्तौसूतस्त्वष्टरिसारथौ ॥ ६१ ॥ व्यक्तःप्राज्ञेऽपिदृष्टांतावुभौशास्त्रनिदर्शने ॥ क्षत्तासा
रथौद्वाःस्थेक्षत्रियायांचशूद्रजे ॥ ६२ ॥ वृत्तांतःस्यात्प्रकरणेप्रकारेकार्त्स्न्यवार्तयोः ॥ आनर्तःसमरेनृत्यस्थाननीवृद्विशेषयोः
६३ ॥ कृतांतोयमसिद्धांतदैवाकुशलकर्मसु ॥ श्लेष्मादिरसरक्तादिमहाभूतानितद्गुणाः ॥ ६४ ॥ इंद्रियाण्यश्मविकृतिःशब्दयोनिश्च
धातवः ॥ कक्षांतरेऽपिशुद्धांतोनृपस्यासर्वगोचरे ॥ ६५ ॥ कासूसामर्थ्ययोःशक्तिर्मूर्तिःकाठिन्यकाययोः ॥ विस्तारवल्ल्योर्व्रततिर्व
सतीरात्रिवेश्मनोः ॥ ६६ ॥ क्षयार्चयोरपचितिःसातिर्दानावसानयोः ॥ आर्तिःपीडाधनुष्कोट्योर्जातिःसामान्यजन्मनोः ॥ ६७ ॥ ४२
प्रचारस्यंदयोरीतिरीतिर्डिंबप्रवासयोः ॥ उदयेऽधिगमेप्राप्तिस्त्रेतात्वग्नित्रयेयुगे ॥ ६८ ॥ वीणाभदेऽपिमहतीभूतिर्भस्मनि·

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

संपदि॥ नदीनगर्योर्नागानां भोगवत्यथ संगरे॥६९॥ संगे सभायां समितिः क्षयवासावपि क्षिती॥ रवेरर्चिश्च शस्त्रं च वन्हिज्वाला च हेतयः
७०॥ जगती जगति च्छंदोविशेषेऽपि क्षितावपि पंक्तिश्छंदोऽपि दशमं स्यात्प्रभावोऽपि चायतिः॥७१॥ पत्तिर्गतौ च मूले तु पक्षतिः पक्षभेदयोः॥
प्रकृतिर्योनिलिंगे च कैशिक्याद्याश्च वृत्तयः॥७२॥ सिकताः स्युर्वालुकापि वेदे श्रवसि च श्रुतिः॥ वनिता जनितात्यर्थानुरागायां च योषिति॥
७३॥ गुप्तिः क्षितिव्युदासेऽपि धृतिर्धारणधैर्ययोः॥ बृहती क्षुद्रवार्ताकी छंदोभेदे महत्यपि॥७४॥ वासिता स्त्रीकरिण्योश्च वार्ता वृत्तौ ज
नश्रुतौ॥ वार्त्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते॥७५॥ कलधौतं रूप्यहेम्नोर्निमित्तं हेतुलक्ष्मणोः॥ श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः कृतं ७६
अत्याहितं महाभीतिः कर्मजीवानपेक्षि च॥ युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु॥७७॥ वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले॥ म
हद्राज्यं चावगीतं जन्ये स्याद्गर्हिते त्रिषु॥७८॥ श्वेतं रूप्येऽपि रजतं हेम्नि रूप्ये सिते त्रिषु॥ त्रिष्वितो जगदिंगेऽपि रक्तं नील्यादि रागि च॥७९॥ अ
वदातः सिते पीते शुद्धे बद्धार्जुनौ सितौ॥ युक्ते तु संस्कृते मर्षिण्यभिनीतोऽथ संस्कृतं॥८०॥ कृत्रिमे लक्षणोपेतेऽप्यनंतोऽनवधावपि॥ ख्यात
हृष्टे प्रतीतोभिजातस्तु कुलजे बुधे॥८१॥ विविक्तौ पूतविजनौ मूर्छितौ मूढसोच्छ्रयौ॥ द्वौ चाम्लपरुषौ शुक्तौ शिती धवलमेचकौ॥८२॥ सत्ये साधौ
विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्॥ पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते॥८३॥ निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत्॥ जातोन्नद्ध
प्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी॥८४॥ वृद्धिमत्प्रोद्यतौ सन्ना आदृतौ सादरार्चितौ॥ इति तांताः ॥ अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्ति

(10)

अ· त्रिषु॥८५॥निपागागमयोस्तीर्थमृषिजुष्टेजलेगुरौ॥समर्थस्त्रिषुशक्तिस्थेसंबद्धार्थेहितेऽपिच॥८६॥दशमीस्थौक्षीणरागवृद्धौवीथीपद- कां·
४२ व्यपि॥आस्थानीयत्नयोरास्थाप्रस्थोऽस्त्रीसानुमानयोः॥८७॥ "शास्त्रद्रविणयोर्ग्रंथः संस्थाधारेस्थितौमृतौ॥" इति थांताः॥अभि- ३
प्रायवशौछंदावद्धौनीमूतवत्सरौ॥अपवादौतुनिंदाज्ञेदायादौसुतबांधवौ॥८८॥पादारश्म्यंघ्रितुर्यांशाश्चंद्राग्न्यर्कास्तमोनुदः॥निर्वादोज-
नवादेऽपिशादोजंबालशष्पयोः॥८९॥आरावेरुदितेत्रातर्य्याक्रंदोदारुणेरणे॥स्यात्प्रसादोऽनुरागेऽपिसूदःस्याद्व्यंजनेऽपिच॥९०॥गो-
ष्ठाध्यक्षेऽपिगोविंदोहर्षेऽप्यामोदवन्मदः॥प्राधान्येराजलिंगेचवृषांगेककुदोऽस्त्रियां॥९१॥स्त्रीसंविज्ज्ञानसंभाषाक्रियाकाराजिनामसु,
धर्मेरहस्युपनिषत्स्यादृतौवत्सरेशरत्॥९२॥पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु॥गोष्पदंसेवितेमानेप्रतिष्ठाकृत्यमास्पदं॥९३॥त्रि-
ष्विष्टमधुरौस्वादूमृदूचातीक्ष्णकोमलौ॥मूढाल्पापटुनिर्भाग्यामंदाःस्युर्द्वौतुशारदौ॥९४॥प्रत्यग्राप्रतिभौविद्वत्सुप्रगल्भौविशारदौ॥ इति
दांताः॥ व्यामोवटश्चन्यग्रोधाउत्सेधःकायउन्नतिः॥९५॥पर्याहारश्चमार्गश्चविवधौवीवधौचतौ॥परिधिर्यज्ञियतरोःशाखायामुपसूर्यके,
९६॥बंधकंव्यसनंचेतःपीडाधिष्ठानमाधयः॥स्युःसमर्थननीवाकनियमाश्चसमाधयः॥९७॥दोषोत्पादेऽनुबंधःस्यात्प्रकृत्यादिविनश्वरे॥
मुख्यानुयायिनिशिशौप्रकृतस्यानुवर्त्तने॥९८॥विधुर्विष्णौचंद्रमसिपरिच्छेदेबिलेऽवधिः॥विधिर्विधानेदैवेऽपिप्रणिधिःप्रार्थनेचरे॥९९॥ ४२
बुधवृद्धौपंडितेऽपिस्कंधःसमुदयेऽपिच॥देशेनदविशेषेऽब्धौसिंधुर्नासरितिस्त्रियां॥१००॥विधाविधौप्रकारेचसाधूरम्येऽपिचत्रिषु॥वधू-

(10A)

र्जीयास्नुषास्त्रीचसुधालेपोऽमृतंस्नुही॥ १ ॥ संधाप्रतिज्ञामर्यादाश्रद्धासंप्रत्ययःस्पृहा॥ मधुमद्येपुष्परसेक्षौद्रेऽप्यंधंतमस्य-
पि॥ २ ॥ अतस्त्रिषुसमुन्नद्धौपंडितंमन्यगर्वितौ॥ ब्रह्मबंधुरधिक्षेपेनिर्देशेऽथावलंबितः॥ ३ ॥ अविदूरोऽप्यवष्टब्धःप्रसिद्धौख्यातभूषितौ
इतिधांताः ॥ सूर्यवन्हीचित्रभानूभानूरश्मिदिवाकरौ ॥ ४ ॥ भूतात्मानौधातृदेहौमूर्खनीचौपृथग्जनौ॥ ग्रावाणौशैलपाषाणौपत्रिणौ
शरपक्षिणौ॥ ५ ॥ तरुशैलेप्यशिखरिणौशिखिनौवन्हिबर्हिणौ॥ प्रतियत्नावुभौलिप्सोपग्रहावथसादिनौ॥ ६॥ द्वौसारथिहयारोहौवाजिनो
ऽश्वेषुपक्षिणः॥ कुलेऽप्यभिजनोजन्मभूम्यामप्यथहायनाः॥ ७॥ वर्षार्चिर्व्रीहिभेदाश्चचंद्राग्न्यर्काविरोचनाः॥ क्लेशेऽपिवृजिनोविश्वकर्मार्क
सुरशिल्पिनोः॥ ८॥ आत्मायत्नोधृतिर्बुद्धिःस्वभावोब्रह्मवर्ष्मच॥ शक्रोघातुकमत्तेभोवर्षुकाब्दोघनाघनः॥ ९॥ घनोमेघेमूर्तिगुणेत्रिषुमूर्तेनिरंत
रे॥ अभिमानोऽर्थादिदर्पेज्ञानेप्रणयहिंसयोः॥ १०॥ इनःसूर्येप्रभौराजामृगांकेक्षत्रियेनृपे॥ वाणिन्यौनर्तकीदूत्यौस्रवंत्यामपिवाहिनी॥ ११॥
ह्लादिन्यौवज्रतडितौवंद्यायामपिकामिनी॥ त्वग्देहयोरपितनुःसूनाऽधोजिह्विकापिच॥ १२॥ क्रतुविस्तारयोरस्त्रीवितानंत्रिषुतुच्छके॥ मंदेऽथके
तनंकृत्येकेतावुपनिमंत्रणे॥ १३॥ वेदस्तत्वंतपोब्रह्मब्रह्माविप्रःप्रजापतिः॥ उत्साहनेचहिंसायांसूचनेचापिगंधनं॥ १४॥ आतंचनंप्रतीवाप-
जवनाप्यायनार्थकं॥ व्यंजनंलांछनंश्मश्रुनिष्ठानावयवेष्वपि॥ १५॥ स्यात्कौलीनंलोकवादेयुद्धेपश्वहिपक्षिणां॥ स्यादुद्यानंनिःसरणेवनभेदेप्र
योजने॥ १६॥ अवकाशेस्थितौस्थानंक्रीडादावपिदेवनं॥ उत्थानंपौरुषेतंत्रेसन्निविष्टोद्गमेऽपिच॥ १७॥ व्युत्थानंप्रतिरोधेचविरोधारणेऽपिच,

(11)

अ· मारणेमृतसंस्कारेगतौद्रव्येऽर्थदापने॥१८॥ निर्वर्त्तनोपकरणानुव्रज्यासुचसाधनं॥ निर्यातनंवैरशुद्धौदानेन्यासार्पणेऽपिच॥१९॥ व्यसनंविप कां·
४४ द्भ्रंशेदोषेकामजकोपजे॥ पक्ष्माक्षिलोम्निकिंजल्केतंत्वाद्यंशेऽप्यणीयसि॥१२०॥ तिथिभेदेक्षणेपर्ववर्त्मनेत्रच्छदेऽध्वनि॥ अकार्यगुह्येकौ- ३
पीनंमैथुनंसंगतौरते॥२१॥ प्रधानंपरमात्माधीः प्रज्ञानंबुद्धिचिन्हयोः॥ प्रसूनंपुष्पफलयोर्निधनंकुलनाशयोः॥२२॥ क्रंदनेरोदनाव्हानेव-
र्ष्मदेहप्रमाणयोः॥ गृहदेहत्विट्प्रभावाधामान्यथचतुष्पथे॥२३॥ सन्निवेशेचसंस्थानंलक्ष्मचिन्हप्रधानयोः॥ आच्छादनेसंपिधानमप-
वारणमित्युभे॥२४॥ आराधनंसाधनेस्यादवाप्तौतोषणेऽपिच॥ अधिष्ठानंचक्रपुरप्रभावाध्यासनेष्वपि॥२५॥ रत्नंस्वजातिश्रेष्ठेऽपिवने
सलिलकानने॥ तलिनंविरलेस्तोकेवाच्यलिंगंतथोत्तरे॥२६॥ समानाःसत्समैकेस्युःपिशुनौखलसूचकौ॥ हीनन्यूनावूनगर्ह्यौवेगिशूरौतर
स्विनौ॥२७॥ अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गतावपि॥ इतिनांताः॥ कलापोभूषणेबर्हेतूणीरेसंहतावपि॥२८॥ परिच्छेदेपरीवापःपर्यु-
प्तौसलिलस्थितौ॥ गोधुग्गोष्ठपतीगोपौहरविष्णूवृषाकपी॥२९॥ बाष्पमूष्माश्रुकशिपुत्वन्नमाच्छादनंद्वयं॥ तल्पंशय्याट्टदारेषुस्तंबेऽ
पिविटपोऽस्त्रियां॥३०॥ प्राप्तरूपस्वरूपाभिरूपाबुधमनोज्ञयोः॥ भेद्यलिंगाअमीकूर्मीवीणाभेदश्चकच्छपी॥३१॥ "कुतपोमृगरोमोत्थ
पटेचान्होऽष्टमेंऽशके॥" इतिपांताः॥ रवर्णेपुंसिरेफःस्यात्कुत्सितेवाच्यलिंगकः॥ इतिफांताः॥ अंतराभवसत्वेऽश्वेगंधर्वोदिव्यगा- ४४
यने॥३२॥ कंबुर्नावलयेशंखेद्विजिव्हौसर्पसूचकौ॥ पूर्वोऽन्यलिंगःप्रागाहपुंबहुत्वेऽपिपूर्वजान्॥१३३॥ इतिबांताः॥ कुंभौघटेभमूर्द्धौ

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com